जय भारतभूमे !

(संस्कृतकाव्यम्)

प्रणेता

डा० रमाकान्तशुक्लः

दिल्लीविश्वविद्यालयस्य राजधानीकालेजे
हिन्दी-विभागे वरिष्ठप्राध्यापकः
नई दिल्ली-११००१५

१९८१

प्रकाशिका

देववाणी-परिषद्, दिल्ली

६, वाणी-विहारः, नयी दिल्ली-११००५९
(भारतम्)

जय भारतभूमे ! (संस्कृतकाव्यम्)

रचयिता	:	डा० रमाकान्त शुक्लः
प्रकाशकः	:	देववाणी-परिषद् दिल्ली आर–६, वाणी-विहारः, नयी दिल्ली-११००५९
मुद्रक	:	देववाणी प्रिण्टर्स, उत्तम नगर, नई दिल्ली-५९.
संस्करणम्	:	प्रथमम्, १९८१
प्रतिरूपाणि	:	५००
मूल्यम्	:	त्रिंशद्रूप्यकाणि । रु० ३०-००
©	:	लेखकः

Jaya Bhāratabhūme
(Sanskrit Poetry)

Author	:	Shukla. Dr. Ramakant
Publisher	:	Devavani Parishad, Delhi R–6, Vani Vihar, New Delhi-1 10059.
Printer	:	Dev Vani Printers Uttam Nagar, New Delhi.
Edition	:	First, 1981.
Copies	:	500
Price	:	Rs. 30-00 (Rs. Thirty only)
©	:	Author

समर्पणम्

स्वर्गादपि गरीयस्याः जन्मभूम्याः

स्तवनमिदं

जनन्यै

(श्रीमत्यै प्रियम्वदाशुक्लायै)

सादरं समर्पयति

२४-१२-१९८१

उत्सङ्गलालितो
रमाकान्तः

अनुक्रमः

प्रास्ताविकम् ५

शुद्धिपत्रम् ६

१. जय भारतभूमे ! ... ... ७—३४

२. भजे भारतम् ... ... ३५—४८

३. मम भारतं विजयते ... ... ४९—५०

४. भारतभूमिर्विलसति ... ... ५१—५४

५. जय भारतमेदिनि ! ... ... ५५—५७

६. भारताख्यः स्वदेशः ... ... ५८—६१

७. दिव्यं मम भारतम् ... ... ६२—६४

प्रास्ताविकम्

भारतमवलम्ब्य मया कानिचित् पद्यानि छात्रावस्थायां रचितान्यासन् । गतवर्षे च 'भाति मे भारतम्' इत्याख्यं मद्रचित काव्यं प्रकाशितमभूत् । ततः परमपि मया कानिचित्पद्यानि भारतमवलम्ब्य प्रणीतानि । तेषामेवात्र 'जय भारतभूमे' इतिशीर्षकायामस्यां पुस्तिकायां सङ्कलनं कृतम् । एतेष्वनेकानि पद्यानि आकाशवाण्या लखनऊकेन्द्रेण समायोजितायां विशिष्टसंस्कृतकविसभायां, देववाणीपरिषदायोजितेऽखिलभारतीयसंस्कृतकविसम्मेलने च मया पठितानि । केषाञ्चित् पद्यानामाकाशवाण्या लखनऊकेन्द्रात् संगीतबद्धा प्रस्तुतिरपि कलाकारैर्विहिता । ये श्रोतार एतेषां पद्यानां मुद्रितं सङ्कलनमिच्छन्ति स्म, आशासे, अस्याः पुस्तिकायाः प्रकाशनेन तेषामाकांक्षा पूर्णा स्यात् ।

अत्र भारतस्य कविसम्मतं स्वरूपमुन्मील्यते । प्रशस्तिपरकेष्वेतेषु पद्येषु भारतस्य कटुयाथार्थ्यस्य वर्णनं नाभिधया विधीयते । किन्तु यदपि प्रशंसापरं भणितं तत्रापि अतिशयोक्तिर्नास्ति, अपि तु स्वभावोक्तिरेवास्ति । 'सत्यं ब्रूयात्प्रियं ब्रूयान्न ब्रूयात्सत्यमप्रियम्' इति वाक्यमनुसरता मया प्रियमेव सत्यमुक्तम् । तथापि यदि क्वचित्किञ्चिदप्रियत्वमपि व्यज्येत तर्हि तदपि मम जन्मभूमेर्वैशिष्ट्यमेव स्वीकरणीयम् ।

देववाणी-परिषदः कृते कृतज्ञतामनुभवामि ययास्याः पुस्तिकायाः प्रकाशनमनुष्ठितम् ।

२४-१२-१९८१ — विद्वच्चरणपद्मचञ्चरीकः

आर ६ वाणी-विहारः, — रमाकान्तशुक्लः

नयी दिल्ली-११००५९ ।

शुद्धिपत्रम्

(प्रथममशुद्धं रूपं, तदनु शुद्धं रूपं, तदनु कोष्ठके पृष्ठ-संख्या तदनु च पङ्क्तिसंख्या दीयन्ते । पङ्क्तिगणना-काले शीर्षक-संख्या-पङ्क्त्योर्गणना नैव कार्या । कृपालवः पाठकाः शुद्धिपत्रानुसारं त्रुटीः संशोधयितुं सादरं प्रार्थ्यन्ते ।)

शरणागतपरिपालशीले - शरणागतपरिपालनशीले (१३/३), **शस्यशामलवसनवृते** - शस्यश्यामलवसनवृते (१३/४), ० **जिनतेह** ० - ०जिनगेह० (१६/२), **बद्रीविशाल** - बदरीविशाल (२८/५), **प्रेयःश्रेयःससाधनिके** - प्रेयःश्रेयःसाधनिके (२७/२), **समाराधितानेत्रैकशास्त्रैश्च** - समाराधितानेकशास्त्रैश्च (३७/७), ० **यौवनश्रो** - ० यौवनश्रीः (३८/३), **चरित्र्यपुञ्जैः** - चारित्र्यपुञ्जैः (४२/२), **बुभुक्षपरो** - बुभुक्षापरो (४७/६), **विश्वयुते** - विश्वनुते (५५/८)

जय भारतभूमे !

(१)

गङ्गायमुनाकावेरी-

कृष्णागोदाचलवीचियुते !

शिप्राशाबरमतीनर्मदा-

गण्डकतुङ्गतरङ्गयुते !

शोणचनाबविपाशासरयू-

ब्रह्मपुत्रकल्लोलकरे !

जय जय जय हे भारतभूमे !

जय जय जय भारतभूमे !

❀

(२)

पूर्वापरजलनिधिप्रक्षालित-

केरलतामिलनाडुपदे !

एलाललितलवङ्गलता-

परिवर्द्धितविहगामोदमदे !

विन्ध्यहिमालयसह्यमलय-

पारसगिरिनारावलीधरे !

जय जय जय हे भारतभूमें !

जय जय जय भारतभूमे !

❀

(३)

बोकारो-राउरकेला-स्वन-

बधिरीकृतदिग्गजकर्णे !

तारापुरसंयन्त्र-भिलाई-

वीरभद्र - भास्वरवर्णे !

भव्य-बरौनी-मथुरा-

तैलविशोधकीर्तिप्रकाशयुते !

जय जय जय हे भारतभूमे !

जय जय जय भारतभूमे !

(४)

वृत्तिहीन-निर्धन-शोषित-

! मानवपरिसान्त्वनयत्नपरे !

भिन्नजातिकुलधर्मवर्ण-

! लोकैक्यापादनयत्नपरे !

लोकतन्त्रपरिरक्षणशीले !

! अशरणशरणविधानकरे !

जय जय जय हे भारतभूमे !

! जय जय जय भारतभूमे !

(५)

ग्रामयुते ! पुरखेटयुते !

! बहुनगरयुते ! नररनारियुते !

नेतृयुते ! अभिनेतृयुते !

! कविकोविदविद्वद्यूथयुते !

योगियुते ! बहुभोगियुते

! ऽमितकलायुते ! बहुपर्वधरे !

जय जय जय हे भारतभूमे !

! जय जय जय भारतभूमे !

(६)

काशीमथुरापुरीद्वारका-

हरिद्वारमाहात्म्ययुते !

सेतुबन्धकन्याकुमारिका-

गङ्गासागरकीर्तियुते !

बदरीनाथ-वैष्णवो-ज्वाला-

हेमकुण्डशुभयशोधरे !

जय जय जय हे भारतभूमे !

जय जय जय भारतभूमे !

(७)

नवजलधरवर्षितकीलाल-

समेधितकर्षकवृन्दवृते !

शरणागतपरिपालशीले

शस्यशामलवसनवृते !

सर्षपपुष्प-रसालमुकुल-

संवर्द्धितप्रियपिकमोदमदे !

जय जय जय हे भारतभूमे !

जय जय जय भारतभूमे !

❀

(८)

ताशकन्दशिमलानुबन्धे-

! दर्शितशान्त्यनुरागोद्रेके !

सीमान्तेषु प्रख्यापितनिज-

! भटरणविजगीषोद्रेके !

हरिकोट्टा-पोखरणप्रसारित-

! निजविज्ञानोन्नतिगाथे !

जय जय जय हे भारतभूमे !

! जय जय जय भारतभूमे !

(६)

कालिदासतुलसीकम्बन-

! गालिबरवीन्द्ररसखानयुते !

पम्परन्नजयदेवसूर-

! विद्यापतिपन्तप्रसादनुते !

ब्रह्मानन्दसहोदररस-

! सज्जनकोविदकविकाव्यधरे !

जय जय जय हे भारतभूमे !

! जय जय जय भारतभूमे !

(१०)

शेषमहेशदिनेशसुरेश-

रमेशप्रदर्शितनिजलीले !

मधुकैटभदशवदनकंसमुर-

वृत्रासुरशिशुपालकले !

शिबिदधीचिप्रह्लादहरि-

श्चन्द्रादिचरित्रोज्ज्वलशोभे !

जय जय जय हे भारतभूमे !

जय जय जय भारतभूमे !

(११)

गिद्दा-भँगड़ा-रास-चर्चरी-

लोकनृत्यहृतजनचित्ते !

भरतनाट्य-कत्थक-कथाकली-

नृत्यतरङ्गितनिजचित्ते !

घेर-डाँडियारास-विर्नतित-

नरनारीचयकेलिधरे !

जय जय जय हे भारतभूमे !

जय जय जय भारतभूमे !

❀

(१२)

कुम्भ-सोनपुर-नासिकमेला-

रथयात्राविस्तृतकृत्ये !

वैशाखी-विजया-पोङ्गल-

होली-दीपालीकृतनृत्ये !

क्रिसमस-ईदमुबारक-कोजा-

गिरीपूर्णिमाह्लादयुते !

जय जय जय हे भारतभूमे !

जय जय जय भारतभूमे !

❀

(१३)

अगणितमन्दिरमस्जिद-
गिरिजागृहजिनतेहगुरुद्वारे !
नवनवमठसमाजसंस्थे
नानाविधकुललोकाचारे !
अगुणसगुणप्रणिधानशुभे
जय भक्तिज्ञानकर्मभूमे !
जय जय जय हे भारतभूमे !
जय जय जय भारतभूमे !

❀

(१४)

हीराकुण्ड-भाखड़ा-नागल-

नागार्जुनसागरबन्धे !

प्रसृतकुशेशयकेतकपाटल-

ललितलवङ्गलतागन्धे !

जीवनदायिनि! विद्युद्दायिनि!

प्रकृतिप्रमोदकलाभूमे !

जय जय जय हे भारतभूमे !

जय जय जय भारतभूमे !

❀

(१५)

रामकृष्णगौतमगान्धी-

नेहरूरवीन्द्रप्रेरितलोके !

मानस-बीजक-थिरुक्कुरल-

भारत-रामायण-हृतशोके !

सत्त्वोद्रेकयुते कविकर्म-

युते लोकाराधनभूमे !

जय जय जय हे भारतभूमे !

जय जय जय भारतभूमे !

(१६)

नवलरसालमुकुलसौरभ-

भावितभृङ्गालीगानधरे !

चम्पकबकुलनागकेसर-

पाटलपाटीरामोदधरे !

शीतलमन्दसुगन्धसमीरे !

धृतकेकीकोकिलकीरे !

जय जय जय हे भारतभूमे !

जय जय जय भारतभूमे !

❀

(१७)

आम्रलकुचकदलीनारङ्गक-

सेवास्वादकविहगयुते !

अभ्रंलिहयन्त्रालयचिमनी-

धूमैर्मलिनीकृतककुभे !

यवगोधूमशालिचणक-

क्षेत्रैः शस्यश्यामलैर्युते !

जय जय जय हे भारतभूमे !

जय जय जय भारतभूमे !

(१८)

नग्नबुभुक्षितवासविहीन-

जनानामेकाश्रयभूते !

जटिलप्रपञ्चप्रताडित-

वृत्तिविहीनजनैकाश्रयभूते !

अशरणशरणास्पदभूते

सन्तोषमौनमौर्ख्ययुते !

जय जय जय हे भारतभूमे !

जय जय जय भारतभूमे !

❀

(१६)

दारिद्र्यानलदग्धदेह-

जीवौघोद्धारणयत्नपरे !

शोषितकर्षककार्मिकपीडो-

न्मूलनहेत्वाक्रन्दकरे !

जय जय हे युद्धाग्निविरोधिनि !

जय जय पञ्चशीलभूमे !

जय जय जय हे भारतभूमे !

जय जय भारतभूमे !

❀

(२०)

जागृतिशीले ! क्रान्तिविलासे!

कान्तियुते ! सम्मानयुते !

विद्वत्तोषिणि ! मानसपोषिणि !

समरविरोषिणि ! शान्तियुते !

सत्यार्हिसापरहितकरुणा-

सर्वसहता - प्रीतिधरे !

जय जय जय हे भारतभूमे !

जय जय जय भारतभूमे !

❀

(२१)

जय हरिनामामृततृप्ते
जय प्रेयःश्रेयःससाधनिके !
ब्राह्मक्षात्रप्रभापूरे
व्यापारयुतेऽमितकर्मयुते !
त्यागभोगभूमे जय जय जय
'जनगणमन' जयगानयुते !
जय जय जय हे भारतभूमे !
जय जय जय भारतभूमे !

❁

(२२)

गङ्गायमुनासरयूवरुणा-

वीचिपवित्रीकृततीर्थे !

उपकाशी-काशी-प्रयाग-

लक्षितविहसद्विद्यातीर्थे !

विश्वनाथ - बद्रीविशाल-

राघवयादवपूजाशीले !

जय जय जय हे भारतभूमे !

जय जय जय भारतभूमे !

❀

(२३)

वायु-भूमि-जलयानगणै-

दर्शितनिजशक्तिभरालोके !

टङ्कृतोपगर्जनप्रख्यापित-

निजबलभूतिभरालोके !

नित्यनवीनोपग्रहमोक्षण-

प्रभृतिप्रदर्शितवर्चस्वे !

जय जय जय हे भारतभूमे !

जय जय जय भारतभूमे !

❀

(२४)

तव वृन्दाविपिने विहरति

कृष्णो गोपीजनमुदकारी ।

तव कैलासे हरति हरो

मन्मथविषमहिमालाधारी ।

तव साकेते क्रीडति रामो

मिथिलायां जनककुमारी ।

जय जय जय हे भारतभूमे !

जय जय जय भारतभूमे !

❀

(२५)

दलपरिवर्तनकारिनेतृ-

निन्दां कुर्वाणास्तव लोकाः ।

राष्ट्रभक्तिमीश्वरपूजा-

मनिशं मन्वानास्तव लोकाः ।

दुरवस्थां समूलमुन्मूलयितुं

कृतकल्पास्तव लोकाः ।

जय जय जय हे भारतभूमे !

जय जय जय भारतभूमे !

❀

(२६)

त्वयि गायति शंकरपादश्रीः
'भज गोविन्दं मूढमते !
'सिया राममय सब जग जानी'
त्वयि तुलसीदासो ब्रूते ।
भक्तास्त्वयि गायन्ति निमीलित-
नेत्रा 'जय जगदीश हरे' !
जय जय जय हे भारतभूमे !
जय जय जय भारतभूमे !

❀

(२७)

गौरवशालिनि मोदप्रदायिनि

प्रकृतिनटीलीलाभूमे !

चतुर्वर्गफलदायिनि

भगवन्नामरूपलीलाभूमे !

श्रमशक्तेरुल्लासविधायिनि

रमाकान्तशुक्लाभिनुते !

जय जय जय हे भारतभूमे !

जयं जय जय भारतभूमे !

❀

(२८)

परिमितशब्दैरमितगुणान्
गायामि कथं ते वद पुण्ये !
चुलुके जलधिं तुङ्गतरङ्गं
करवाणि कथं वद धन्ये !
जय सुजले सुफले वरदे
विमले कमला-वाणी-वन्द्ये !
जय जय जय हे भारतभूमे !
जय जय जय भारतभूमे !

❀

भजे भारतम् !

(१)

सदाज्ञानविध्वंसकारी मनोज्ञः
समालोक्यते यत्र वाणी-विहारः ।
विधत्ते स्वमित्रं च यः प्राणिमात्रं
भजेऽहं मुदा भारतं तं स्वदेशम् ।
भजे तं मुदा भारतं दिव्यदेशम् ॥

(२)

कुटुम्बं धरित्री दया यस्य मित्रं
मनुष्यत्वसेवा यदीयोऽस्ति धर्मः ।
असत्यं च शत्रुः समस्तेऽपि लोके
भजेऽहं मुदा भारतं तं स्वदेशम् ।
भजे तं मुदा भारतं दिव्यदेशम् ॥

❀

(३)

प्रजातन्त्ररक्षा यदीयं हि लक्ष्यं
तितिक्षा यदीयास्ति संसारगीता ।
तथैवार्जवं यस्य वित्तं वरेण्यं
भजेऽहं मुदा भारतं तं स्वदेशम् ।
भजे तं मुदा भारतं दिव्यदेशम् ।।

(४)

स्वकीयां बुभुक्षां पिपासां नियम्य
सदा रक्षिता येन भीताः प्रपन्नाः ।
यमाहुर्विदग्धास्तथा शान्तिदूतं
भजेऽहं मुदा भारतं तं स्वदेशम् ।
भजे तं मुदा भारतं दिव्यदेशम् ।।

❀

(५)

न मम्लौ यदीयं मुखं निःस्वतायाम्
विमूढं चित्तं च वित्तोपलाभे ।
सदा दानशीलश्च यो याचकेभ्यो
भजेऽहं मुदा भारतं तं स्वदेशम् ।
भजे तं मुदा भारतं दिव्यदेशम् ॥

(६)

स्फुरद्रत्नसङ्काशविद्वद्वरेण्यैः
समाराधितानेत्रैकशास्त्रैश्च शिष्यैः ।
गभीरैश्च चित्तैः सदालङ्कृतो यो
भजेऽहं मुदा भारतं तं स्वदेशम् ।
भजे तं मुदा भारतं दिव्यदेशम् ॥

❀

(७)

क्वचिज्जाह्नवी तुङ्गवीचिः प्रसन्ना
क्वचिद्भानुजागोमतीव्यासशिप्राः ।
क्वचिन्नर्मदायौवनश्री यदन्तो
भजेऽहं मुदा भारतं तं स्वदेशम् ।
भजे तं मुदा भारतं दिव्यदेशम् ॥

(८)

क्वचिद्वीरपुञ्जः समुत्साहधीरः
क्वचिन्नेतृवर्गः प्रजोद्बोधरक्तः ।
क्वचिच्छीलवान् यत्र सङ्घो मुनीनां
भजेऽहं मुदा भारतं तं स्वदेशम् ।
भजे तं मुदा भारतं दिव्यदेशम् ॥

❀

(९)

क्वचिद्विज्ञगोष्ठी क्वचिच्छास्त्रचर्चा
क्वचित्काव्यसन्ध्या क्वचिन्नाट्यवेला ।
क्वचिद्गीतिगानं च यस्य स्वभावो
भजेऽहं मुदा भारतं तं स्वदेशम् ।
भजे तं मुदा भारतं दिव्यदेशम् ॥

(१०)

कला कालिदासस्य बाणस्य वाणी
रवीन्द्रस्य गीतिर्विवेकस्य वाणी ।
लता-तानसेन-स्वरा यत्र मुग्धाः
भजेऽहं मुदा भारतं तं स्वदेशम् ।
भजे तं मुदा भारतं दिव्यदेशम् ॥

❀

(११)

निवासः सतामाश्रयः सद्गुणानाम्
जरामृत्युहीनः प्रकृत्या विलासः ।
तथा सच्चिदानन्दसेवापरो यो
भजेऽहं मुदा भारतं तं स्वदेशम् ।
भजे तं मुदा भारतं दिव्यदेशम् ॥

(१२)

धनं विद्यतेऽध्यात्म्यसंज्ञं यदीयं
जगद्दुःखसङ्घातविध्वंसदक्षम् ।
कला यस्य चेतोहरा भान्ति लोके
भजेऽहं मुदा भारतं तं स्वदेशम् ।
भजे तं मुदा भारतं दिव्यदेशम् ॥

❀

(१३)

कलाज्ञानविज्ञानवाणिज्यशोधै-

स्तथा कल्पनाभावनातर्कबोधैः ।

त्रिलोक्यां त्रिकाले प्रभाभासुरो यो

भजेऽहं मुदा भारतं तं स्वदेशम् ।

भजे तं मुदा भारतं दिव्यदेशम् ।।

(१४)

अतीतं भविष्यत्तथा वर्तमानं

जगत्प्रेरणादायकं वै यदीयम् ।

चतुर्वर्गसिद्धिं दिशन् यः प्रसिद्धो

भजेऽहं मुदा भारतं तं स्वदेशम् ।

भजे तं मुदा भारतं दिव्यदेशम् ।।

❀

(१५)

पवित्रैर्व्रतैरुत्सवैस्तीर्थसंघै-

स्तथा दर्शनज्ञानचारित्र्यपुञ्जैः ।

नवाभिः कथाभिस्समृद्धश्च योऽस्ति

भजेऽहं मुदा भारतं तं स्वदेशम् ।

भजे तं मुदा भारतं दिव्यदेशम् ॥

(१६)

क्षिपन्नैपलं भास्करं चार्यभट्टं

हसन् - भाखड़ाभा-नरौरा-मिषेण ।

भिलाई-बुकारोस्वनैर्यश्च गर्जन्

भजेऽहं मुदा भारतं तं स्वदेशम् ।

भजे तं मुदा भारतं दिव्यदेशम् ।

❀

(१७)

क्वचिच्चञ्चलायाः नवीनैर्विलासैः

क्वचिच्छारदायास्तथा शुक्लहासैः ।

सदा नूतनो मोदते राजते यो

भजेऽहं मुदा भारतं तं स्वदेशम् ।

भजे तं मुदा भारतं दिव्यदेशम् ॥

(१८)

क्वचिद्राजनीतेर्वितानैः प्रपूर्णः

क्वचिद्गृध्रगोमायुसंवादपूर्णः ।

क्वचिद्यश्च साहित्यसंगीतपूर्णः

भजेऽहं मुदा भारतं तं स्वदेशम् ।

भजे तं मुदा भारतं दिव्यदेशम् ॥

❀

(१९)

क्वचिच्चाटुकारैः क्वचिन्मानवित्तैः

क्वचिन्मित्रघातैः क्वचिद्भीतचित्तैः ।

क्वचित्सिंहनादैश्च यश्चित्रवर्णो

भजेऽहं मुदा भारतं तं स्वदेशम् ।

भजे तं मुदा भारतं दिव्यदेशम् ॥

(२०)

नितान्तं विहीनः कदाचित्तु यः स्याद्

गृहस्फोटकैर्दस्युभिः षिड्गसंघैः ।

तथा वञ्चकैस्तस्करैर्भ्रष्टकृत्यैः

भजेऽहं मुदा भारतं तं स्वदेशम् ।

भजे तं मुदा भारतं दिव्यदेशम् ॥

❀

(२१)

बलात्कारहत्यापहारप्रहाराः

अशिक्षावधूदाहभिक्षाप्रचाराः ।

कदाचित्तु लुप्ताः भविष्यन्ति यस्मात्

(अवश्यं विलुप्ता भविष्यन्ति यस्मात्) ।

भजेऽहं मुदा भारतं तं स्वदेशम् ।

भजे तं मुदा भारतं दिव्यदेशम् ॥

(२२)

'मदीयः स्वदेशः', 'प्रियं भारतं मे'

'मदीया प्रिया मातृभूमिः पवित्रा' ।

इतीत्थं त्रिलिङ्ग्यां जनैर्गीयते यो

भजेऽहं मुदा भारत तं स्वदेशम् ।

भजे तं मुदा भारतं दिव्यदेशम् ॥

❀

(२३)

न यत्राङ्कुशः कस्यचिद्वाचि शक्यो
न वा कार्यजाते, न वा चित्तवृत्तौ ।
विनीतोऽपि यः स्वाभिमानव्रतोऽस्ति
भजेऽहं मुदा भारतं तं स्वदेशम् ।
भजे तं मुदा भारतं दिव्यदेशम् ।।

(२४)

मदीया परिच्छिन्नवाणी यदीयान्
अशेषान् विशेषान् यथार्थं प्रगातुम् ।
अशक्तास्त्यशक्तास्त्यशक्तास्ति नूनं
भजेऽहं मुदा भारतं तं स्वदेशम् ।
भजे तं मुदा भारतं दिव्यदेशम् ।

❀

(२५)

अहो यस्य लोकोत्तरैः स्तोत्रपुञ्जैः
रमाकान्तशुक्लोऽपि धन्योऽद्य जातः ।
विदग्धाशिषां राशिभिर्लाल्यते च
भजेऽहं मुदा भारतं तं स्वदेशम् ।
भजे तं मुदा भारतं दिव्यदेशम् ।।

(२६)

न यत्रास्तु कश्चिद्बुभुक्षपरो ना
न वा वासहीनो न वासोविहीनः ।
न वा शोषितः क्वापि केनापि कोऽपि
भजेऽहं मुदा भारतं तं स्वदेशम् ।
भजे तं मुदा भारतं दिव्यदेशम् ।।

(२७)

प्रणम्यः प्रणम्यो मया यः स्वदेशः
सदा कीर्तनीयः सदा वन्दनीयः ।
सदा वर्धतां मोदतां राजतां यो
भजेऽहं मुदा भारतं तं स्वदेशम् ।
भजे तं मुदा भारतं दिव्यदेशम् ॥

(२८)

उपेक्ष्येत नो यत्र वैदुष्यपुञ्जो
न वै वर्धतां यत्र दारिद्र्यपुञ्जः ।
तथा दुर्बलाघात आस्तां न यत्र
भजेऽहं मुदा भारतं तं स्वदेशम् ।
भजे तं मुदा भारतं दिव्यदेशम् ॥

❀

मम भारतं विजयते

(१)

निगमागमैरुपेतं विज्ञानरत्नरम्यम् ।
वेदाङ्गपूतगात्रं मम भारतं विजयते ॥

(२)

लोकप्रबोधशीलं शोकप्रणाशशीलम् ।
चेतोविकासकुशलं मम भारतं विजयते ॥

(३)

सह्याद्रिविन्ध्यहिमवत्सप्ताद्रिकीर्तितश्री ।
गंगाजलैः पवित्रं मम भारतं विजयते ॥

(४)

क्वापि श्रमेण सहितं क्वापि प्रमोदभरितम् ।
नानाक्रियाकलापं मम भारतं विजयते ॥

(५)

गांधीरवीन्द्रगौतमनहरूप्रभृत्यनेकैः ।
जननायकैः समृद्धं मम भारतं विजयते ॥

(६)

कम्बन्कबीरतुलसीकविकालिदासगीतम् ।
विबुधैः सदैव चेष्टं मम भारतं विजयते ॥

(७)

कोणार्कताजसाँचीखजुराहोसारनाथैः ।
कुतुबादिना च सहितं मम भारतं विजयते ॥

(८)

श्रुतभाखड़ानरौराकोटाभिलाइकल्पैः ।
संयन्त्रकैः समिद्धं मम भारतं विजयते ॥

(९)

सिंहस्थकुम्भसारणनवचण्डिकादिभव्यैः ।
मेलापकैः प्रसन्नं मम भारतं विजयते ॥

(१०)

विश्वस्य बान्धवं यत् मोक्षस्य साधकं यत् ।
गायच्च पञ्चशीलं मम भारतं विजयते ॥

(११)

निन्दन्तु नीतिनिपुणाः यदि वा स्तुवन्तु कामम् ।
नित्यं विकाशमानं मम भारतं विजयते ॥

❀

भारतभूमिर्विलसति

(१)

वैदिक-सौगत-नास्तिक-
चार्वाकार्हत-प्रभृतिबहुधर्माः ।
वादे वादे बोधं,
यत्र लभन्ते मुदोत्फुल्लाः ॥

(१)

औदार्यं धार्मिक्यम्,
आध्यात्म्यं नित्यप्रगतिशीलत्वम् ।
अन्ये चापि यदीयाः,
विश्वस्मिन् सद्‌गुणाः ख्याताः ॥

(३)

प्रकृतिविलासो यस्यां,
विकिरति हासं स्वकीयमवदातम् ।
कष्टसहिष्णुत्वं च,
यस्याः प्रकृतौ सहजसिद्धम् ॥

❀

(४)

विरोधिनां तत्त्वानां,
सत्त्वानाञ्चापि विषमवृत्तीनाम् ।
समन्वयं या कुरुते,
नवनवशोभाभिवृद्ध्यर्थम् ॥

(५)

आशावादरतायाः,
आदर्शोद्घोषणासुनिपुणायाः ।
यस्या निखिलापीयं,
वसुधैव कुटुम्बकं भवति ॥

(६)

लोकोत्तरचरितानां,
लोकाराधननियुक्तमनुजानाम् ।
या जन्मभूमिरुदिता,
रुदिता अपि यत्र हसिताः स्युः ॥

❀

(७)

स्नेहं दयां च सौख्यं,
जायामपि यत्र लोकपूजार्थम् ।
मुञ्चन् रामोऽद्यापि,
भगवानिव पूज्यते लोकैः ॥

(८)

गीता गङ्गा गावो,
गीर्वाणगवी तथा च गीतानि ।
ग्रामाः गुरवो ग्रन्थाः,
यस्या गरयन्ति गरिमाणम् ॥

(९)

अक्रोधेन क्रोधं,
साधुतया चाप्यसाधुतासरणिम् ।
दानेन या कदर्यं,
जयेदहिंसाबलेन हिंसां च ॥

❀

(१०)

सत्पुत्राणां हि यथा,
कुपुत्रकाणां तथैव या चेष्टाः ।
समबुद्ध्या किल सहते,
यतो न माता कुमाता स्यात् ॥

(११)

वाणीविहारशीला,
शीलाब्धितरङ्गिता जलधिरशना ।
सुजला सुफला शस्य-
श्यामा सुखदा तथा वरदा ॥

(१२)

अगणितगुणगणपूर्णा,
चित्रविचित्रैर्जनैस्सदा लसिता ।
आर्या भारतभूमि-
र्विलसति जगतीतले सेयम् ॥

❁

जय भारतमेदिनि विश्वनुते !

(१)

हिमवत्कलहासमरीचिसिते !
यमुनाजलनीलविभामहिते !
रविचुम्बितकोकनदारुणिते !
जय भारतमेदिनि विश्वनुते !

(२)

नवसर्षप-पीतदुकूलयुते
बहुशस्यसमूहविभाहरिते !
मलयानिलमोदकलाकलिते !
जय भारतमेदिनि विश्वयुते !

(३)

अतिपुण्यपुरातनपद्धतिभि-
र्नवनूतनयोगप्रयोगचयैः !
समयोचितनीतिबलैः सहिते !
जय भारतमेदिनि विश्वनुते !

❀

(४)

त्रिविधैः खलु तापचयैर्विकले
मनुजे शुभनिर्वृतिमादधती ।
नवमङ्गलदानविधानकरे !
जय भारतमेदिनि विश्वनुते !

(५)

मुनिभिर्मनुजैर्दनुजैर्विबुधैः
कविभिर्नवचित्रकलैश्च तथा ।
निजजन्मसु जन्मसु कामयिते !
जय भारतमेदिनि विश्वनुते !

(६)

जय वेदविभासितचित्तगुहे !
बहुदर्शनगोप्यरहस्ययुते !
अपवर्गसुभक्तिविधानकरे !
जय भारतमेदिनि विश्वनुते !

❀

(७)

अभिमानधनैः रणशौण्डभटैः
कृषिकर्मपरैः श्रमिकैर्लसिते ।
शुचिशान्तिसुधाभरिते वरदे
जय भारतमेदिनि विश्वनुते !

(८)

जय नैकप्रदेशप्रभालसिते !
बहुवर्णजनौघविभालसिते !
बहुलोकसुरीतिरसैः सरसे
जय भारतमेदिनि विश्वनुते !

(९)

करुणाकलिते ! मुदिताभरिते !
सरसे ! सरले ! मृदुले ! ललिते !
सुदृढे ! दुरितौघविनाशकरे !
जय भारतमेदिनि ! विश्वनुते !

❀

भारताख्यः स्वदेशः

(१)

सलिलनिधितरङ्गैर्धौतपादाम्बुजोऽसौ
हिमगिरिशुभहासैर्भासयन्नाननं स्वम् ।
प्रकृतिकलविलासैर्मोदकारी जनानां
जयति जगति नित्यं भारताख्यः स्वदेशः ॥

(२)

शिखिकुलकलकेका काकली कोकिलानाम्
कलयति कलकाले कान्तकान्तारप्रान्तान् ।
प्रकृतिकलविलासान् यत्र पश्यन्ति नित्यं
विकचकमलनेत्रैर्हर्षफुल्लैस्सरांसि ॥

(३)

नवपरिमलगन्धैर्मन्दशीतैः समीरैः
प्रकृतिनववधूटीस्वाङ्गरागैः परागैः ।
धृतमधुकरपुञ्जैर्गुञ्जितैर्मञ्जुकुञ्जे-
र्विलसति मधुमत्तो यत्र राजा ऋतूनाम् ॥

❃

(४)

भृगुकलकलनादैः किञ्चिदाभाषयन्त्यो
जलपतनजफेनैर्मोदमाना हसन्त्यः ।
मरकततृणवासैरावृता यत्र लुब्धाः
विदधति गिरिमालाः स्वैः पयोधृद्भिराशाः ॥

(५)

भ्रमिकरजलवीचिभ्रूकटाक्षान् क्षिपन्त्य-
स्तटगतखगशब्दैः सिन्धुमाकारयन्त्यः ।
धृतबहुविधरत्नं यान्ति लावण्यपूर्णं
बहुनदिनदधाराः यत्र नित्यं नदीशम् ॥

(६)

वनविटपिकदम्बैः केलिलोलाकदम्बै-
र्मुरलिवटसनाथैर्भृङ्गकृष्णैः स्थलैश्च ।
चलरवितनयायाः श्यामिकाभिश्च यत्रा-
नुभवति खलु वृन्दाकाननं कृष्णमीशम् ॥

❀

(७)

भवति मृदुलशोभा सर्षपाणां वसन्ते
 शरदि कमलराशिः प्रस्फुटो जायते च ।
हरितवसनशोभां वर्द्धयन्ती पृथिव्या
 विलसति तृणराजिर्यत्र वर्षर्तु काले ॥

(८)

कनकगुणनिबद्धैः कुन्तलानां कलापैः
 सम इह चलविद्युद्दामशोभः प्रसन्नः ।
करिगण इव कृष्णो नीरगण्डूषकारी
 स्वनति मृदुगभीरं तोयवाहः सुकाले ।

(९)

क्व मिलति विषधृग्भिर्मित्रता चन्दनानाम् ?
 क्व च मलयजगन्धो याति धीरः समीरः ?
क्व च वितरति मोदं शुभ्रकाश्मीरशोभा ?
 प्रकृतिकलविलासो भारतादन्यतः क्व ?

❀

(१०)

क्व च मुनिगणपूर्णा आश्रमाः सम्भवन्ति ?
नवकिसलयरागा यत्र चित्तं हरन्ति ।
त्यजति ऋजुमुनीनां क्रोडमागत्य यत्र
नवमृगसुतवृन्दं नाभिनालानि, चित्रम् !

(११)

क्वचिदपि हरिणाली सञ्चरन्ती चकास्ति
क्वचिदपि च गजानां यत्र यूथं प्रसन्नम् ।
क्वचिदपि दृढनादो यत्र कण्ठीरवाणाम्
उपवन-वनभागा ईदृशाः कुत्र सन्ति ?

(१२)

धवलजलपवित्रा पापनाशे प्रसक्ता,
क्वणितजलतरङ्गा कच्छपीधारिणी च ।
जलगणशुचिकर्त्री नीलकण्ठासना च
विलसति शुभगङ्गा शारदा च क्व शुभ्रा ?

❋

दिव्यं मम भारतम्

विविधपण्डितमण्डलमण्डिता
प्रकृतिपुण्यविलाससमाहिता ।
विविधवीरवरावृतमण्डला
जयति भारतभूमिरियं भुवि ॥१॥

यस्मिल्लोकगणः सुखेन वसति
प्राप्तोऽभयं सर्वदा ।
गौरश्यामविभेदहीनजनता
यत्रास्ति कार्याकुला ।
स्वातन्त्र्येण चमत्कृतं च परितो
यत्रास्ति भूमण्डलम् ।
दिव्यं तन्मम भारतं विजयते
संसार-सम्भूषणम् ॥२॥

येषां देशसुरक्षणाय नभसि
प्रज्वालिते चानले ।
झञ्झावातसमेतवृष्टिषु मनो
यातुं सदा प्रस्तुतम् ।
सन्त्येतादृशवीरभावभरिता
यस्यान्तराले भटाः ।
भव्यं तन्मम भारतं विजयते ।
संसार-सम्भूषणम् ॥३॥

यत्स्वातन्त्र्यदिनप्रमोदसमये
मोदाकुला मेदिनी ।
आशाः सौरभमण्डिता विजयते
मुग्धस्त्रिरङ्गो ध्वजः ।
यत्रानेकविधैः प्रमोदकरणै-
रातिथ्यकृत्यैर्नवैः ।
मान्यन्तेऽतिथयः स मे विजयते
देशः सदा भारतम् ॥४॥

यन्त्रोद्योगकलानिकेतनयुतं
वैज्ञानिकैः पावितम् ।
कीर्तिश्रीयुतदेशभक्तचरितै-
श्चित्रं चमत्कारकम् ।
विद्यारक्षणदक्षपण्डितगणै-
र्नित्यं समाराधितम् ।
विस्तीर्णं वसुधातले विजयते
मे भारतं भारतम् ॥५॥

यद्भूमौ प्रवहन्ति देवसरिता
साकं नदीनां गणाः ।
यन्मूर्द्धा हिमशैलमण्डनयुतः
पादाः समुद्रादृताः ।
यन्मूर्मिनितरां सुवर्णसहिता
धान्यैः सदा दृश्यते ।
दिव्यं तन्मम भारतं विजयते
संसार - सम्भूषणम् ॥६॥

यद्वृन्दाविपिने मुकुन्दचरिता-
न्यद्यापि साक्षादिव ।
यत्काशीश्वरविश्वनाथकृपया
पापान्धकारापहा ।
यत्तीर्थानि सदैव पापदहनं
कुर्वन्ति शान्तं जलैः ।
भव्यं तन्मम भारतं विजयते
संसार - सम्भूषणम् ॥७॥

यस्मिन्नस्ति सहिष्णुतापरिमिता
तोषः परं राजते ।
यत्रास्ते ऋजुता परं प्रमुदिता
यस्मिंश्च शान्तिः परा ।
वैपुल्यं भजते च यत्र विदुषां
पाण्डित्यपुञ्जं सदा ।
दिव्यं तन्मम भारतं विजयते
संसार - सम्भूषणम् ॥८॥

❀